The five trees of the heaven.
1 2 3 4 5
मन्दारपारिजातकहरिचन्दनकल्पवृक्षसन्ताना: ।

The Meru mountain 2.
1 2
पञ्चैते सुरतरवो मेरु: सुरपर्वतो ज्ञेय: ॥१३५॥

The mountain Sumeru or Meru 7.
1 2 3 4
शक्रक्रीडाचलो मेरु: सुमेरुर्हेमपर्वत: ।
5 6 a 7
रत्नसानुरिति ख्यातो हेमाद्रिस्त्रिदशालय: ॥१३६॥

The sky 15.
1 2 3 4
नभो मरुद्वर्त्म वियद्विहाय—
5 6 7
स्तारापथ: पुष्करमन्तरिक्षम् ।
8 9 10 11 12
व्योमाम्बरं विष्णुपदं च खं द्यौ–
13 14 15
विहायसा स्याद्गगनं तथा द्यु: ॥१३७॥

Sound, noise 8.
1 2 3 4 5 6 7 8
ह्लादो नाद: शब्द: स्वानो ध्वान: स्वरो रवो घोष: ।

Speaking, speech, saying 4.
1 2 3 4 b
अभिधानव्याहारोदीरणकथनादयस्तु तद्भेदा: ॥१३८॥

uproar 4. Ma.
1 2 3 4
कोलाहल: कलकलस्तुमुलो व्याकुलो रव: ।

He nnected ea h 2.
1 2 c
उच्चावचमिति प्रोक्तमनिबद्धं तु यद्वच: ॥१३९॥

F er 2. — Deep 2.
1 d 2 1 2
उच्चैस्तरो ध्वनिस्तारो मन्द्रो गम्भीर उच्यते ।

ll inarticulate. — Harsh 2.
1 2 1 2
कलश्च मधुरोऽव्यक्तो विक्रुष्टो निष्ठुरो मत: ॥१४०॥

sing. — Sweet and true.
1 2 1
सान्त्वं स्यान्मधुरं वाक्यं प्रियं सत्यं च सूनृतम् ।

Jc istinct 2. hs — Senseless 2.
1 2 1 2
ख्यातं म्लिष्टमविस्पष्टमबद्धं वियुतार्थकम् ॥१४१॥

ken rapidly 2. — Uttered with omission 2.
1 2 1 2
तूर्णोदितं निरस्तं स्याद् ग्रस्तं लुप्तपदं स्मृतम् ।

Sputtered 2. — Vulgar 2.
1 2 1 2 e
अम्बूकृतं सनिष्ठीवं ग्राम्यमश्लीलमुच्यते ॥१४२॥

Significative alteration of voice 1.
1
भिन्नकण्ठो ध्वनिर्धीरै: काकुरित्यभिधीयते ।

Consisting of compound words. — A period containing many compound words.
1 2
समासप्रायमाख्यातं पदजातं च तण्डकम् ॥१४३॥

a भीमाद्रि, धीमद्रि b दयश्च c भिवद्धं च d उच्चै: स्वरो e श्लीलमिष्यते ।